# Shri Padmanabhakataksha Nakshatramala

# શ્રીપદ્મનાભકટાક્ષનક્ષત્રમાલા

## Document Information

```
Text title : Padmanabhakataksha Nakshatramala
File name : padmanAbhakaTAkShanakShatramAlA.itx
Category : vishhnu, viShNu
Location : doc_vishhnu
Proofread by : Aruna Narayanan
Latest update : October 28, 2025
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2025

*sanskritdocuments.org*

# શ્રીપદ્મનાભકટાક્ષનક્ષત્રમાલા

॥ શ્રીઃ ॥

॥ શ્રીમતે રામાનુજાય નમઃ ॥

॥ શ્રીમતે વેઙ્કટશેષાર્યમહાદેશિકાય નમઃ ॥

શ્રીમદુભયવે. વિલ્લૂર્. નડાદૂર. શ્રીભાષ્યસિંહાસનાધિપતિ.
સાહિત્ય-વ્યાકરણ-વાચસ્પતિ. શ્રીમદ્વેઙ્કટશેષાર્યમહાદેશિકાનુગૃહીતા

વન્દે વેઙ્કટશેષાર્યં વાત્સલ્યાદિગુણાર્ણવમ્ ।
વાત્સ્યશ્રીવરદાચાર્યતનયં કરુણાનિધિમ્ ॥

અથ શ્રીપદ્મનાભકટાક્ષનક્ષત્રમાલા ।
કામં કાઙ્ક્ષિતસિદ્ધ્યૈ પ્રથમગુરું નૌમિ પદ્મનાભમહમ્ ।
પ્રાચાર્યમણ્ણયાર્યં સ્વાચાર્યં સુન્દરાર્યગુરુવર્યમ્ ॥ ૧॥

ભાર્ગવીપ્રભયા ભ્રાજદ્વક્ષોભાગેન ભાસ્વરમ્ ।
ભજતામભયોદ્યુક્તં પદ્મનાભમહં ભજે ॥ ૨॥

શ્રીપદ્મનાભ ! મહિતે તવ સન્નિધાને
કા શક્તિરસ્તિ મમ વર્ણમપીહ વક્તુમ્ ।
સ્તોતું પુનઃ કિમુ દયાજલધે ! તવૈવ
કાઽપિ પ્રસક્તિરિહ માં મુખરીકરોતિ ॥ ૩॥

પુત્રસ્નુષાશયનવાહનનેત્રયુગ્મ-
પૌત્રાદિમેષુ તવ સત્સ્વપિ તાદૃશેષુ ।
કો વા ન તે સવિધમેત્ય ગુણાનવોચત્
નાપ્લાવિતસ્તવ દયાશિશિરૈરપાઙ્ગૈઃ ॥ ૪॥

શ્રીપદ્મનાભ ! લલિતં તવ દિવ્યમૂર્તિ-
રૂપાનુરૂપમહમાભરણં પ્રદિત્સુઃ ।

આત્મન્યશક્તિમથ વીક્ષ્ય કરોમિ વાચા
નક્ષત્રગુમ્ભનલસન્નવરત્નમાલામ્ ॥ ૫॥

આપુર્યદીયલવતઃ કુલશેખરાદ્યાઃ શ્રીપુષ્ટિમશ્વયુગનર્ઘગજાદિહૃદ્યામ્ ।
યા પુણ્યરાશિવિભવેષુ વિહારશીલા સા પદ્મનાભ ! તવ પાતુ કટાક્ષમાલા ॥ ૬॥

ત્વામેકદૈવતધિયા શરણં પ્રપન્નં ક્ષામેતરાત્મકરુણાભરણીયમેનમ્ ।
શ્રીપદ્મમઞ્જુલમુખેન્દુવિહારહેલા શ્રીપદ્મનાભ ! તવ પાતુ કટાક્ષમાલા ॥ ૭॥

શ્રીપદ્મસમ્ભવમુખૈરનઘૈર્મખાશૈઃ યા કૃત્તિકાપટધરેણ સમં મખઘ્ના ।
આપદ્યતે શરણમાશ્રિતપક્ષપાલા શ્રીપદ્મનાભ ! તવ પાતુ કટાક્ષમાલા ॥ ૮॥

આરોહિણીં દિશતિ સમ્પદમૃદ્ધિમૂલાં યા રોહિણીશસુધયેવ સદાર્દ્રશીલા ।
તાપત્રયપ્રશમનોપહિતાત્મલીલા સા પદ્મનાભ ! તવ પાતુ કટાક્ષમાલા ॥ ૯॥

કિં પદ્મજાત્ મૃગશિરઃ કરતોઽન્યતો વા સમ્પન્નમસ્તુ કૃપણાન્ કૃપણા ભજન્તે ।
આપં ચતુર્વિધપુમર્થમહાફલાય શ્રીપદ્મનાભ ! તવ દિવ્યકટાક્ષમાલામ્ ॥ ૧૦॥

આર્દ્રાપરાધમપિ મામનુકમ્પનીયં સાર્દ્રાવલોકનસુધારસવર્ષિણીયમ્ ।
હે પઙ્કજાક્ષ ! કરુણાનૃતિચન્દ્રશાલા શ્રીપદ્મનાભ ! તવ પાતુ કટાક્ષમાલા ॥ ૧૧॥

પ્રાગ્જન્મપુણ્યવિરહાત્ વસુહીનમેનં વાગ્જન્યસંસ્તવગુણૈરુદયદ્વિકાસમ્ ।
પાપં પુનર્વસુયુતં વિદધાત્વસૌ માં શ્રીપદ્મનાભ ! તવ દિવ્યકટાક્ષમાલા ॥ ૧૨॥

પુષ્યત્પ્રભાપરિચિતાં પુનરુક્તશીતાં હૃષ્યત્પ્રપન્નકુલરક્ષણબદ્ધદીક્ષામ્ ।
સ્વાપં વિનૈવ સુખદાનમહે વિલોલાં શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૧૩॥

સ્વામિન્! સદા કરુણયા હિતયા વિભાસ્વદાશ્લેષયા જનિતસર્વજનપ્રસાદામ્ ।
શ્રીમન્નનન્તપુરદિવ્યવિમાનધામન્ ! શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૧૪॥

પદ્મોદ્ભવશ્ચ સ ચ ભવો મઘવા ચ શાસ્તા સદ્મોપરિ સ્થિતિજુષસ્તવ સંસ્તવાશાઃ ।
આપન્નિવારણચણાં ઇતિ યાં સ્તુવન્તિ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૧૫॥

વલ્ગુ ત્વદીયપદપદ્મરતિં વિહાય ફલ્ગુન્યહં વ્યધિતધીઃ વિષયે હિ પૂર્વમ્ ।
આપ્તં શ્રમં શમયિતું તમનન્તશાયિન્ ! શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૧૬॥

સર્વોત્તરા તવ દયા યદિ ફલ્ગુનીયં ગર્વોત્તરાઽપિ સુખિતા મમ ધીશ્શુભા સ્યાત્ ।
ધીપઞ્જરે મમ સદૈવ યથા ભવાન્ સ્યાત્ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૧૭॥

ન્યસ્તે ભરે ત્વયિ મયા સહસૈવ સર્વં હસ્તે ભવેદિતિ ફલં દૃઢનિશ્ચયોઽહમ્ ।
પ્રાપં તવૈવ ચરણૌ શરણં શરણ્યૌ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૧૮॥

અત્રાખિલેશ! ભુવને પરિચિન્ત્યમાને ચિત્રા વિભાતિ તવ વિશ્વજનીનરીતિઃ ।
આપદ્મજાતમખિલસ્ય ગુહાશયાત્મન્! શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૧૯॥

સ્વાતીપ્સિતાનિ કુરુતે ત્વયિ કાઽપિ ભક્તિઃ નાતીવચિત્રમિદમપ્યહિતેઽત્યુદારે ।
સાપત્રપં વિબુધપાદપમાદધાનાં શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૦॥

કાન્તં તવાઙ્ઘ્રિયુગલં નિગલં હૃદો મે શ્રાન્તસ્ય સંસૃતિપથે શરણં ગતસ્ય ।
શ્રીમન્ ! વિશાખમુખલેખકુલૈકદેવ ! શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૧॥

સર્વાપરાધમપિ તાવકસઞ્ચિતં તે શર્વાદયોઽપિ નિગદન્તિ તવૈવ ભોગ્યમ્ ।
આપન્ન ઇત્યવિગણય્ય મમાપરાધાન્ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૨॥

જ્યેષ્ઠા ભવન્તિ ગુણશીલમુખૈશ્ચ બોધે શ્રેષ્ઠાઃ પરે કતિ કતીહ ન વા તવેષ્ટાઃ ।
રૂપં સ્વમપ્યવિદુષિ સ્વયમેવ બાલે શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૩॥

શીલં ન વીક્ષ્ય દયતે હિ ભવાન્ પ્રપન્ને મૂલ ! ત્વમેવ શરણં મમ હે ભવેતિ ।
દ્વૈપં વચોઽપિ હૃદયે સદયેઽહ્યભૂત્તત્ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૪॥

આષાઢભૂતિરિવ પૂર્વમહં મહત્સુ વેષાન્તરેણ રચિતું કપટં પટીયાન્ ।
હે પઙ્કજાક્ષ ! તવ દાસ્યસુખઃ કથં સ્યાં શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૫॥

આષાઢમુત્તરમુડુ ત્વિહ જન્મતારં શેષા વદન્તિ પરમેવ તવ પ્રસક્તેઃ ।
આપાદને ન વિતથં વિદધાન એતત્ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૬॥

જાતાયતાદમલમાશ્રવણાત્ સુજાતાત્ ભીતાભયપ્રદરુચેઃ નયનામ્બુજાતાત્ ।
આપન્નરક્ષણવિધૌ અતિમાત્રલોલા શ્રીપદ્મનાભ ! તવ પાતુ કટાક્ષમાલા ॥ ૨૭॥

ત્વત્કીર્તનં તવ કથાશ્રવણં તવાર્ચા સત્કીર્તિહેતુમપિ સદ્ગતિકારણાનિ ।
કે પઙ્કમોચનચણં ન વિદન્તિ ધીરાઃ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૮॥

યુક્તાત્મનોઽપિ જગતિ ત્વમબાધનિષ્ઠાન્ ભક્તાન્ સ્વયૈવ દયયાઽભયયા તનોષિ ।
કાપથ્યશીલરુચિરસ્મિ કથં કૃતી સ્યાં ? શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૨૯॥

સન્તાપકારિણિ ભૃશં ભવસઞ્જ્વરે મે ચિન્તાકુલૈઃ શતભિષગ્પ્રવરૈઃ ચિકિત્સા ।
આપદ્યતે કિમુ ભવન્તમૃતેઽમૃતેશ ! શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૩૦॥

પૂર્વં યથાકથમપિ સ્થિતિભાગિનોઽપિ ચાર્વઞ્ચિતાક્ષિયુગભાદ્રપદા હિ તે સ્યુઃ ।
યે પત્રિલાસ્તવ કદાચિદપાઙ્ગવર્ષૈઃ શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૩૧॥

આર્દ્રાપરાધશતમૂલમહો નરાસ્ત્વદાદ્યં તરઙ્ગિતતરઙ્ગમપાઙ્ગસઙ્ગમ્ ।

પ્રાપ્ય દેહમથ ભાદ્રપદોત્તરાસ્તે શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૩૨॥

ઘોરેઽવતીહ ખલુ કો ભવદાવવહ્નૌ દૂરે ત્વદેકશરણં ચ નિતાન્તતાન્તમ્ ।
શ્રીપ ! ક્ષમો જનમિમં ત્વદૃતે દયાલો શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૩૩॥

આશાસ્તથૈવ બહુશોઽનુભવન્તિ સર્વાઃ આશાસ્તથાભિજિતવૈરિગણા ભજન્તિ ।
યે પદ્મશોભિ તવ પાદયુગં નતાસ્તે શ્રીપદ્મનાભ ! તવ દેહિ કટાક્ષમાલામ્ ॥ ૩૪॥

પદ્માવલીયમખિલેશ ! તવ પ્રસક્ત્યૈ હૃદ્યા ભવત્વિતિ સમર્પયતે વિનમ્રઃ ।
શ્રીપદ્મજાબ્જકરલાલિતપાદપદ્મ ! શ્રીપદ્મનાભ ! તવ વેઙ્કટશેષદાસઃ ॥ ૩૫॥

॥ ઇતિ શ્રીપદ્મનાભકટાક્ષનક્ષત્રમાલા સમાપ્તા ॥

વન્દે વેઙ્કટશેષાર્યં વાત્સલ્યગુણવારિધિમ્ ।
વાત્સ્યશ્રીવરદાચાર્યતનયં કરુણાનિધિમ્ ॥

॥ શ્રીમતે વેઙ્કટશેષાર્યમહાદેશિકાય નમઃ ॥

Proofread by Aruna Narayanan

---

*Shri Padmanabhakataksha Nakshatramala*

pdf was typeset on October 30, 2025

Please send corrections to *sanskrit@cheerful.com*